SAṄGĪTACŪḌĀMAṆI

A work on Indian Music

BY

KAVICAKRAVARTI JAGADEKAMALLA

EDITED BY

PANDIT D K VELANKAR
Vyākaranālankāra,
Sanskrit Mahāvidyālaya,
University of Baroda

Published with the subsistence grant of the Sangeeta Natak Akadami,
NEW DELHI.

ORIENTAL INSTITUTE,
BARODA
1958

Printed at the M S University of Baroda Press (Sadhana Press), Raopura, Baroda by Shri Ramanlal J Patel, and published on behalf of the Maharaja Sayajirao University of Baroda by Dr Bhogilal J Sandesara, Director, Oriental Institute, Baroda.

Price Rs 6-50 nP.

Copies of this work can be had from —

Secretary,
Sangeet Natak Akadami,
70, Regal Buildings,
NEW DELHI.

FOREWORD

It gives me great pleasure to introduce to the students of Indian Music, the Sangīta-Cūdāmani of Kavi-Cakravartī Jagadekamalla edited from a single palm-leaf manuscript in malayālam script from the collection of the Oriental Institute, Baroda The work is a valuable addition to our printed texts on ancient Indian music especially because it antedates the famous Sangīta-Ratnākara of Śārngadeva Editing of such a rare text from a single manuscript was a difficult problem and Shri D K Velankar Shastri has rendered great service to the cause of Indian Music by doing so with remarkable acumen Attention of scholars is especially invited to portions of the text dealing with Tālas and Rāgas which corroborate the above remarks

The Sangeet Natak Akadami, New Delhi, was pleased to sanction a grant of Rs 10,000/- in March, 1955 for the publication of the following six volumes on music, dance and dramatics, from MSS preserved in this Institute Accordingly the following works have been undertaken for publication in the Gaekwad's Oriental Series of the M S University of Baroda

(1) Rāgatattvavibodha of Śrīnivāsa
(2) Sangītacūdāmani of Kavi-Cakravartī Jagadekamalla
(3) Rasa-Kaumudī of Śrīkantha
(4) Rāgamālā of Mesakarna, Rāgamālā of Jīvarājadīksita and Rāgamālā of Śankarsana
(5) Nrtyādhyāya of Aśokamalla
(6) Vīṇā-laksana of Kaviśārdūla Parameśvara

Out of these Rāgatattvavibodha was published as No 126 of the G O Series, and the Sangītacūdāmani is published here as No 128 of the same series The delay in publication is mainly due to the nature of the texts and manuscripts, often there being only one manuscript, as in the case of the present text

I take this opportunity to express our thanks to the Sangeeta Natak Akadami for the generous grant given in order to enable us to publish these works

Oriental Institute,
Baroda, 20-6-1958

B J SANDESARA,
Director

श्री ।

अनुक्रमणिका ।

		पृष्ठम् ।
१	प्रस्तावना ।	१–७
२	मङ्गलाचरणम् ।	१
३	देशीसङ्गीतलक्षणम् ।	१
४	गीतमाहात्म्यम् ।	१
५	स्वरत्रैविध्यम् ।	२
६	नादस्वरूपम् ।	२
७	नादशब्दनिष्पत्ति ।	२
८	नादप्रकारा ।	३
९	प्रबन्धप्रकरणम् ।	४
१०	मातृकाप्रकारा. ।	५
११	तालप्रकरणम् ।	६
१२	तालशब्दनिष्पत्ति. ।	६
१३	तालप्राणा ।	६
१४	जातय ।	६
१५	मात्रालक्षणम् ।	७
१६	मार्गा ।	७
१७	ग्रहा ।	७
१८	लय. ।	७
१९	यति ।	८
२०	प्रस्तार' ।	८
२१	एकोत्तरशतताला ।	८
२२	देशीताललक्षणानि ।	१०
२३	प्रबन्धताला ।	२१
२४	प्रबन्धताललक्षणानि ।	२५
२५	चञ्च(च्च)त्पुटप्रकारा ।	३४
२६	चाचपुटप्रकारा. ।	३६

२७ षट्पितापुत्रकप्रकारा । ३७
२८ सम्पक्वेष्ट(ष्टा)कप्रकारा । . ३८
२९ उद्घट्टप्रकारा । ४२
३० चतुरस्रजातिताला । ४५
३१ त्र्यस्रजातिताला । .. ४६
३२ चतुरस्रजातितालाना लक्षणानि । . .. ४७
३३ त्र्यस्रजातितालाना लक्षणानि । .. ५२
३४ देशीतालाना केरलभाषानुवाद । ५८
३५ वाद्यप्रकारा । ६९
३६ स्वरसप्तकोद्धार । ७१
३७ रागनामानि । ७३
३८ रागोत्पत्ति । . . ८३
३९ रागरागिणीप्रस्तार । ८४

श्री ।

प्रस्तावना ।

अनादिकालादारभ्यास्मिन् भारते वर्षे धर्मादिचतुर्विधपुरुषार्थसिद्ध्यर्थमनेकानि शास्त्राणि प्रवृत्तानि । तेष्वन्यतम सङ्गीतशास्त्र धर्मार्थकाममोक्षाणा सुलभमद्वितीयमतिरमणीय च साधनमिति शास्त्रान्तरेभ्यो वरीवर्ति । सङ्गीतशास्त्रस्य धर्मसाधनत्व "ब्राह्मणौ वीणागाथिनौ गायत" (तै ब्रा ३-९-१४) इत्यादिश्रुतिभ्य सिध्यति । अर्थसाधनत्व देवतार्चनादिषु गीतादे परिग्रहात् आसर्वज्ञसदाशिवादामूढपशु विगलितवेद्यान्तरतयाऽऽनन्दाविर्भावकत्वेन हृद्यत्वाच्च लोकत सिद्धम् । कामसाधनत्व "तस्माद्गायन्त स्त्रिय कामयन्ते" इत्यादिश्रुतिवाक्येषु लोकेषु च सुप्रसिद्धम् । मोक्षसाधनत्व चास्य शास्त्रस्य

> वीणावादनतत्वज्ञ श्रुतिजातिविशारद ।
> तालज्ञश्चाप्रयासेन मोक्षमार्ग च गच्छति ॥

(याज्ञवल्क्यस्मृति ३-४-११५)

इति याज्ञवल्क्यस्मृते प्रतीयते ।

एव चानायासेनातीव हृद्यतया च चतुर्विधपुरुषार्थसाधकमेतादृश परमानन्ददायक रमणीय शास्त्रान्तर नास्तीत्यस्य शास्त्रस्याध्ययनाध्यापनादिना प्रचार सर्वत्र भारते सवृत्त ।

शास्त्रस्याऽस्याध्ययनाध्यापनसौकर्यार्थं महर्षिभिराचार्यैश्च भूरिशो ग्रन्था निबद्धा अद्यापि निबध्यन्ते च । प्राचीनेषु ग्रन्थेषु बहवो ग्रन्था. कालमहिम्ना नामशेषा सवृत्ता । अवशिष्टा प्राचीनानामाचार्याणा विद्यारतिं प्रगाढं पाण्डित्यं शास्त्रपरिश्रमाश्च द्योतयन्त स्थाने स्थाने ग्रन्थालयेषु सरक्षितास्तिष्ठन्ति । सङ्गीतशास्त्रस्याभिवृद्ध्यर्थं प्राचीनैराचार्यैर्निबद्धाना ग्रन्थाना सशोधन प्रकाशन चातीवोपकारकमिति बहुभि पण्डितै प्राचीना बहवो ग्रन्था प्रकाशिता । तथाप्यवशिष्यन्ते बहव । तेषा प्रकाशनमावश्यकमिति कृत्वाऽत्रत्ये प्राच्यविद्यामन्दिरग्रन्थालये विद्यमान. सङ्गीतचूडामणिनामकोऽप्रकाशितो ग्रन्थ प्रकाशयितुमुपक्रम्यते ।

अस्य **सङ्गीतचूडामणिग्रन्थस्य** पाठनिर्धारणार्थं निम्नोक्त एक एव ग्रन्थ उपलब्ध उपयोजितश्च ग्रन्थान्तरस्यानुपलब्धे । तथाहि । (१) **ऑफ्रेच**प्रणीते महति सूचिसागरे (Catalogus catalogorum) सङ्गीतचूडामणेर्ग्रन्थनिर्देशो नोपलभ्यते । (२) सशोधकवरेण्याना **गोडे**महोदयानामपि ग्रन्थस्यास्योपलब्धिस्थान न ज्ञातमासीदिति तेषा "सङ्गीतचूडामणिस्तस्य समयश्च" इति निबन्धात् (Studies in Indian Literary History Vol I by P K Gode P 211) प्रतीयते । (३) अस्य ग्रन्थस्य केवल प्रथमस्तालाध्यायो द्वितीयो रागाध्याय पञ्चमो नृत्याध्यायश्च इदानी समवाप्यन्ते इति रामकृष्णकविभिर्भरतकोशप्रस्तावनायामुक्तम् । परन्तु तैरुपलब्धिस्थानं न निर्दिष्टमिति तेषामयमुल्लेखो ग्रन्थान्वेषणार्थं नोपयुक्तस्तथापि तेषा सविधे ग्रन्थोऽयमासीदिति तै स्थाने स्थाने निर्दिष्टेभ्य सङ्गीनचूडामणिग्रन्थप्रमाणेभ्योऽभ्यवसीयते । (४) आन्ध्रसाहित्यपरिषत्पुस्तकालये सङ्गीतचूडामणेरेको ग्रन्थो विद्यते

इति कृष्णमाचार्यैं सस्कृतवाङ्मयेतिहासे प्रोक्तम् । (History of Classical Sanskrit Literature P 853 Para 1005) सोऽय ग्रन्थो नास्माभिर्बताविगत । (५) अनूपसस्कृतपुस्तकालये ग्रन्थोऽयं सङ्गृहीतस्तत्र प्रथमाध्याय सम्पूर्ण । द्वितीयस्तु खण्डितो वर्तते । इति '**जगदेकमल्लकृत सङ्गीतचूडामणि**' इति निबन्धादवगम्यते । (Sangītacūdāmani of Jagadekamalla by K Mādhava Krsna Śarmā—The Indian Historical Quarterly, Culcutta, 1944 P 87) अयमपि ग्रन्थो दुरासद सवृत्त ।

ग्रन्थवर्णनम् ।

१ वटोदरम् । प्राच्यविद्यामन्दिरम् । ग्रन्थाङ्क ९८९२ । ताडपत्रात्मक । मलयलिपि । गीर्वाणभाषा मलयभाषा च मध्ये । पत्राणि ६६ । प्रतिपत्र पङ्क्तय ८ । प्रतिपङ्क्त्यक्षराणि ३० ३२ । दैर्घ्यम् ९ अङ्गुलिमितम् । परिणाह —१३ अङ्गुलिमित । हस्ताक्षर रुचिरम् । पत्राणि त्रुटितानि जीर्णानि च । चतुश्शतवत्सरेभ्य प्राग्लिखितो भवेदिति प्रतीयते । अस्य प्रतिकृतिर्देवनागरीलिप्या सुगृहीतनामधेयै-नैकविधलिपिभाषादिकोविदै पण्डितवरैर्व्यङ्कटरमणशास्त्रिभिरत्रैव वर्षत्रयादूर्ध्वं विहिता ।

ग्रन्थकार ।

अस्य ग्रन्थस्य प्रणेता **कविचक्रवर्ती** कश्चित् । तथाहि ग्रन्थोपक्रमे प्रोक्तम् ।

श्रुतिस्वरग्रामसमग्ररागवर्णक्रमस्थानघनाभिरामम् ।
सङ्गीतचूडामणिमात्मराज्यकल्प विधत्ते **कविचक्रवर्ती** ॥

इति । ग्रन्थकारविषये किमपि निर्देशान्तर समग्रेऽपि ग्रन्थे न समुपलभ्यते ।

श्लोकोऽयं जगदेकमल्लकृते (क्रै श. ११३८–११५०) सङ्गीतचूडामणिग्रन्थे समुपलभ्यते । तथाहि

ईर्ष्यारोषकषायिताशयरमापादप्रणामप्रियो
राधापीनपयोधराश्रयनभ प्रस्पर्धिवक्ष स्थल ।

गोपीचित्तविनोदनव्यतिकरे गोपीकृतात्मा स्वय
देवानामपि देवता स भवता पुष्णातु विष्णु सुखम् ॥ १ ॥

हसीचामरनिम्नगातटगता यन्मूर्ध्नि विद्योतते
तत्फुल्लत कुन्दरुचिप्रतानजविनी (?)रम्या हिमाशो कला ।
(फुल्लत्कुन्दरुचिप्रतानजयिनी रम्या हिमाशो कला ।)

कर्ता विस्फुरदद्रिराजतनया नेत्रोत्सवाना भृश
स श्रेयासि तनोतु वस्त्रिभुवनक्षेमङ्कर शङ्कर ॥ २ ॥

हरस्य देहार्धधरापि वामा कामस्य कामान् परिपूरयन्ती
नारीषु साम्राज्यवशादिवासौ सिहासनस्था वरदा सुगौरी ॥ ३ ॥

श्रुतिस्वरग्रामसमग्ररागवर्णक्रमस्थानघनाभिरामम् ।
सङ्गीतचूडामणिमात्मराज्यकल्प विधत्ते **कविचक्रवर्ती** ॥ ४ ॥

[1] मतङ्गभोजप्रमुखै कृत यद्देशीकृतं लक्ष्यविकीर्णरूपम् ।
तदेव गम्भीरमतिस्फुटार्थं करोति राजा जगदेकमल्ल. ॥ ५ ॥

अथ सङ्गीतचूडामणिग्रन्थोऽतिविस्तृत प्रमाणभूतश्चासीदिति स्मर्यते। तस्येदानी तालरागनृत्ताध्याया समुपलभ्यन्ते प्रबन्धाध्यायो वाद्याध्यायश्च लुप्त । अस्माद्बहवो लक्षणश्लोका सङ्गीतसमयसारे पार्श्वदेवेनोदाहृता ।

अस्यैव जगदेकमल्लकृतस्य सङ्गीतचूडामणिग्रन्थस्य प्रकृतो ग्रन्थ खण्डितस्वरूप इति प्रतीयते । तत्र हेतव —

१ प्रकृते ग्रन्थे प्रबन्धाध्यायोऽपूर्ण । भरतकोशे समुद्धृताना बहूना वचनानामत्राऽविद्यमानत्वात् ।

२ रागाध्याये रागनामधेयान्यत्र केवल समुपलभ्यन्ते । रागलक्षणादिक नास्ति । भरतकोशे यानि रागलक्षणानि जगदेकमल्लस्य समुपलब्धानि तानि टिप्पण्या प्रदर्शितानि ।

३ वाद्याध्याये श्लोकत्रयमत्र दृश्यते ।

४ नृत्ताध्याय सर्वथा नास्ति ।

५ तालाध्याय· सविस्तरो विद्यते ।

अथ जगदेकमल्लो अभिलषितार्थचिन्तामणिकारस्य सोमेश्वरस्य पुत्र कल्याणनगरे (११३८-११५० क्रै श) राज्य चकार इति ज्ञायते इतिहासग्रन्थेभ्य ।

परमप्रामाणिकेन सङ्गीतरत्नाकरकारेण शार्ङ्गदेवेन सङ्गीतग्रन्थकाराणा नामावलौ ‘ परमर्दी च सोमेशो जगदेकमहीपति ’’ इत्यत्र जगदेकमहीपतिपदेन जगदेकमल्लस्य प्रमाणभूतग्रन्थकारत्वेन निर्देश कृत । निर्देशश्चाय सङ्गीनचूडामणिग्रन्थस्य सङ्गीतशास्त्रे महत्व प्रख्यापयति ।

ग्रन्थ ।

अस्य ग्रन्थस्य पाठनिर्धारणार्थं उपरिनिर्दिष्ट एक एव ग्रन्थ आदर्शतया आसीत् । सोऽपि बहुषु स्थानेष्वशुद्धो लुप्ताक्षरो कीटभक्षितश्च । अत एव पाठनिर्णयकार्यं सङ्गीतमकरन्द–रत्नाकर–भरत–मतङ्ग–दत्तिल–समयसार-औमापतादिग्रन्थाना कविरामकृष्णसम्पादितभरतकोशस्य च साहाय्येन यथामति सम्पादितम् । शुद्ध पाठ स्थले स्थले कुण्डलीकृत्य प्रदर्शित । विषमस्थलानि सम्यगवबोधार्थं टिप्पण्यादिभि परिष्कृतानि । ग्रन्थस्याऽस्याऽतिप्राचीनत्वात् प्राचीनसङ्गीतसम्प्रदायस्य चोत्सन्नत्वात् अस्य ग्रन्थस्य सशोधने कियान् परिश्रम इत्यत्राऽस्मिन् शास्त्रे कृतभूरिपरिश्रमा विद्वास एव प्रमाणम् ।

‘ गीत वाद्य च नृत्य च त्रय सङ्गीतमुच्यते ’ इति वचनानुसारेण प्रबन्धतालरागवाद्यनृत्ताध्यायै समग्रस्य सङ्गीतशास्त्रस्य प्रतिपादनात् सङ्गीतचूडामणि सङ्गीतग्रन्थाना चूडामणिरेवासीत् । प्रकृते ग्रन्थे भूयान् विषयो विलुप्त । यावानवशिष्यते तस्य विमर्श इदानीं प्रस्तूयते ।

सङ्गीत द्विधा मार्गो देशी इति । तत्र यद्यपि ग्रन्थकारेण देशेषु देशेषु नरेश्वराणा० इति श्लोके (स० चूडा० १३) देशीसङ्गीतलक्षणमेव प्रोक्त तथापि देशीतालाना मार्गतालाना च प्रतिपादनात्

[1] Sangītacūdāmani of Jagadekamalla by K Mādhava Krsna Śarmā—The Indian Historical Quarterly, Calcutta, 1944 P 87

मार्गसङ्गीतस्यापि विचार कृत. । ग्रन्थेऽस्मिन् प्रथममुपोद्घात अनन्तर प्रबन्धप्रकरण तालप्रकरणं वाद्यप्रकरण रागप्रकरण चेति चत्वारि प्रकरणानि सन्ति ।

एतादृश प्रकरणविभागो ग्रन्थे शङ्खतो यद्यपि नोपदर्शितस्तथापि तत्र तत्राऽस्माभि. प्रकरण-विभागावबोधार्थ कुण्डलीकृत्य प्रदर्शित ।

तत्रोपोद्घाते गीतमाहात्म्यं स्वरत्रैविध्यं नादस्वरूप नादप्रकाराश्च निरूपिता । नादस्थानानि श्रुतय शुद्धा विकृताश्च स्वरास्तेषा कुलानि जातयो वर्णा द्वीपानि ऋषि दैवत छन्दासि विनियोगाश्च ग्रामा मूर्च्छनास्ताना इत्यादिक लुप्त प्रतीयते । तथापि भरतकोशे कञ्चिनी, कला, घना, चालनिका, चित्रा, नान्दी, बाला, मधुकरी, मागधी (माववी), मात्रा, माला, मैत्रा, वर्तिका, विचित्रा, विजया, शार्ङ्गरवा, शिवा, सरघा, सुमुखी चेत्यादय श्रुतय , सप्तस्वराणा मन्त्रा वर्णा दैवतानि रसा स्थानानि ऋषय-श्छन्दासि ध्यानानि इत्यादिक च जगदेकमल्लोक्त प्रमाणतयोपन्यस्त दृश्यते तस्मात् जगदेकमल्लेन प्रकरणमिद सविस्तरमुपनिबद्धमित्यनुमातु शक्यते ।

प्रबन्धप्रकरणे १०१ प्रबन्धाना नामान्येव परिगणितानि । लक्षणादिकं नास्ति । लक्षणादि-भागोऽस्माद्ग्रन्थाल्लुप्त । भरतकोशे प्रबन्धाना लक्षणानि समुपलभ्यन्ते ।
तथाहि—

वृत्तम्—

छन्दोऽनुसारितालेन ललित येन केनचित् ।
स्वरैर्युक्त वियुक्त वा वृत्त गायन्ति कोविदा ॥

श्रीरङ्ग —

प्रस्तारेण स्वरादीना यदि प्रान्ते पदादिका ।
रागैस्त्रिभिस्त्रिभिस्ताले श्रीरङ्ग कथितस्तदा ॥

अभिनन्द —

य पाटैस्तेनकैर्युक्त प्रयुक्तो गीतकोविदै ।
अभिनन्दोऽभिनन्देन तालेनैष विभूषित. ॥

अङ्कध्वनि । आमोद । उमातिलक । एकताली । एला । कन्दुक । चतुर्मुख । चतुष्पदी । चित्रकरणम् । झोम्पट । डेङ्की । तेन्नकरणम् । द्विपदी । धट । ध्वनिकुट्टिनी । पञ्चतालेश्वर । पञ्चानन. । पाटकरणम् । मनोरम । रागकदम्बक । लोष्ठी । विजय । विजयश्री । विलम्भ (लम्भक.) । शरभ-लीलक । श्रीविलास । सिहपद । सिहलील । सुदर्शन. । हर्षवर्धन । इति । एतेषा लक्षणानि भरत-कोशादवगन्तव्यानि विस्तरभयादत्र नोल्लिखितानि । एतावता प्रमाणजातेन मूलग्रन्थे १०१ प्रबन्धाना लक्षणानि भवेयुरिति कल्पयितु शक्यते ।

तालप्रकरणे तालशब्दनिरुक्ति , जाति-कला-मार्ग-ग्रह-लय-यति-प्रस्तारास्तालप्राणाश्च निरूपिता । सङ्गीतमकरन्द-रत्नाकर-दर्पणादिषु १० तालप्राणा प्रतिपादिता । तेष्वस्मिन् ग्रन्थे काल , क्रिया, अङ्गानि चेति प्राणत्रय नास्ति । अनन्तरं १०१ एकोत्तरशततालाना नामानि परिगणितानि । अनुक्रमेण च लक्षणान्यपि प्रदर्शितानि । एते ताला सङ्गीतमकरन्दे लक्ष्यलक्षणसहिता समुपलभ्यन्ते । भरत-

नाट्यशास्त्रे ६० ताला १०१ तालेषु मुख्यतयोक्ता । आदिभरते भरतार्णवे च १०८ ताला, सङ्गीत-रत्नाकरे १२० ताला प्रोक्ता । तत्र क्रमेण सप्तताळाना एकोनविंशतिताळाना चाविक्य विद्यते । सङ्गीतसमयसारसदृशेऽर्वाचीने ग्रन्थे १०१ ताला एव सङ्गृहीता ।

तदनु १०१ प्रबन्धताला सलक्षणं सङ्कीर्तिता । एते औमापतेऽपि दृश्यन्ते ।

ततश्चचत्पुटादय पञ्च मार्गताला सप्रकारा लक्षिता ।

अनन्तरं चतुरस्र-त्र्यस्रजातिताला सलक्षणं वर्णिता । ततश्च प्रथमोक्ताना देशीताला ना केरलभाषयाऽनुवाद सगृहीत । मार्गतालाद्देशीतालस्य वैषम्यं पण्डितेन चतुरकल्लिनाथेन

देशीतालस्तु लघ्वादिमितया क्रियया मत ।
यथाशोभं कास्यतालध्वननादिकया मत ॥ ५-२३५

इति सङ्गीतरत्नाकरश्लोकव्याख्यायामुपपादितमिति तदेव व्याख्यान अत्रोदाह्रियते ।

" **देशीतालस्त्वित्यादि** । अत्र 'तु' शब्दो मार्गतालात् देशीतालस्य वैषम्यद्योतनार्थ । तच्च वैषम्य '**यथाशोभ लघ्वादिमितया क्रियया मत**' इति **यथाशोभ कास्यतालध्वननादिकया मत** इति च विशेषणद्वयेन द्रष्टव्यम् । अत्र **यथाशोभमिति** पद देहलीप्रदीपन्यायेन काकाक्षिन्यायेन वोभयतो योजनीयम् । तत्र **यथाशोभ लघ्वादिमितयेत्यस्यायमर्थ** । अत्र शोभाशब्देन गीतावयवेषु तालावृत्तीना कालसाम्यनिबन्धना सहृदयहृदयङ्गमोच्यते । तामनतिक्रम्येति यस्मिन् गीतावयवे यावदक्षरमितया मात्रया कास्यतालसाम्य भवति तत्र मार्गे पञ्चलघ्वक्षरोच्चारमिता मात्रा नियतत्वेन कथिता । क्वचित्तु ततोऽपि न्यूनया चतुर्लघ्वक्षरोच्चारमितया कालसाम्यम् । अन्यत्र तु ततोऽप्यधिकया षड्लघ्वक्षरोच्चारमितया । यत्र यथा शोभा भवति तामनतिक्रम्य । **लघ्वादिमितयेति** । आदिशब्देन गुरुप्लुतद्रुता गृह्यन्ते । अत्राल्पग्रहणे द्रुतादीति वा महद्ग्रहणे प्लुतादीति वा वक्तव्ये लघ्वादीति वचन देशीतालेषु ग्रहणमोक्षयोर्लघोरेव प्राधान्यद्योतनार्थम् । तेन केवलद्रुतात्मकेऽपि ताले द्रुतद्वय लघूकृत्य ग्रहमोक्षौ कुर्यादिति सम्प्रदायो वेदितव्य । अत्रोक्तस्य मात्राप्रमाणभेदस्य तालविशेषनिष्ठत्वेनोदाहरणमुत्तरत्र तालाना पौनरुक्त्यपरिहारावसरे करिष्यते । **यथाशोभं कास्यतालध्वननादिकयेति** । कास्यतालध्वनने या शोभा क्वचिन्मुक्तनादत्वेन क्वचिद् गृहीतनादत्वेन क्वचिद् विघातेषु करक्रियाविशेषेण क्वचिद् विघाते घातकल्पनया च जायते । ता शोभामनतिक्रम्य कास्यतालस्य ध्वननाद् विस्मयवैचित्र्यजनिताश्चर्यवान् मतो लोकसम्मत इति मार्गतालाद् वैषम्य देशीतालस्य । "

ग्रन्थेऽस्मिन् दर्पण-मदन-नि सारुक-हसलीलादितालाना लक्षणेषु नामभेदेप्यर्थभेदाभावात् अर्थपौनरुक्त्य प्रतीयते तस्य परिहार सप्रमाण कल्लिनाथेन प्रतिपादित इति स एवात्र उपन्यस्यते । तथाहि ।

इह पुनरुक्ततया परिगणितेषु कुडुक्कादितालेषु स्थिताना लघ्वादीना देशीगतत्वेनाऽनियतप्रमाणत्वात् प्रमाणभेदेनापि स्वरूपभेदादर्थपौनरुक्त्याभावाददोष इति । .... किञ्चित् क्वचिद् गीतादावेकस्यैव तालस्यावृत्तिषु प्रमाणभेदो दृश्यते । क्वचिदेकस्यामप्यावृत्तौ लघ्वादिष्वशेषु प्रमाणभेदो दृश्यते । एतत्सर्वं देशीत्वस्य भूषणमेव न दूषणमिति देशीतालरहस्यमाचार्याभिमतमवगन्तव्यम् ।

वाद्यप्रकरणं श्लोकत्रयात्मकमेव विद्यते। तत्र तत-विततादिवाद्यप्रकारा उपवर्णिता ।

रागप्रकरणे स्वरसप्तकोद्धारो वर्णित स च मतङ्गोक्तबृहद्देश्यामागमेषु च उपवर्णितो दृश्यते। ततो मध्यमादिरागादारभ्य शुद्धरागपर्यन्त २९ रागाणा नामान्युक्तानि। ग्रन्थान्तरे शुद्धरागा ३६ परिगणिता । अत्र सप्त नामानि लुप्तानीत्यनुमीयते। ततश्च रागाणामुत्पत्तिरनुक्रान्ता। सापि श्लोकचतुष्टयादूर्ध्वं नोपलभ्यते। अनन्तर रागरागिणीप्रस्तार सविस्तर उपवर्णित । एतावदेव ग्रन्थस्य स्वरूपम् ।

भरतकोशे निम्नोक्ताना ९४ रागाणा लक्षणानि समुपलभ्यन्ते । अन्धाली-लिका। अवस्थान-वराटिका। आदिकामोदा। आभीरी। आम्रपञ्चम । उत्पलिनी। कच्छोली। कम्भरीति । कर्णाटगौड । कर्णाटबगाल । काम्भोजी। कालिन्दी। कुन्तलवराटी। खसिका। गान्धारगतिका। गुण्डक्रिया। गुरुञ्ज । गुर्जरी। गोल्ली। गौड । गौडी। घण्टारव । छाया। छायातोडी। छायानट्टा। छायावेलावली। छोहारी। टक्कसैन्धवी। डोम्बक्रिया। तरङ्गिणी। तुरुष्कतोडी। तोडी। त्रिणेत्रकृति । दक्षिणगुर्जरी । दीप । देवकृति । देशदेवाल । देशवालगौड । देशाख्या। देशी। देशीहिन्दोल । द्राविडगौड । द्राविडवराटिका। धन्यासिका। ध्वनि । नागध्वनि । नाटनारायणी। नाटा। नादान्तरी। नीलोत्पलिनी। पुलिन्दी। पुन्नाट । पौराली। प्रतापवराटिका। प्रतापवेलाउलि । प्रथममञ्जरी। बृहद्दाक्षिणात्या। भम्माणी। भिन्नाभीरी। भुञ्छी। भैरवी। मध्यमादि । मल्लार । मल्लारि । महाराष्ट्रगुर्जरी। मार्गहिन्दोल । माहुरी। मेघरञ्जिका। रङ्गरीति । रामक्री। रीतिकैशिकी । लघुदाक्षिणात्या। ललिता। वराटिका। वेगरञ्जिका। वेलाधूलि । शङ्कराभरण । शाम्बरी। शुद्धबगाल । शुद्धभाषा। शुद्धवराटी। श्रीकण्ठी। श्रीराग.। सालवाहनी। सिंहलीला। सैन्धववराटी। सैन्धवी। सोमराग । सौराष्ट्रिका। सौराष्ट्री। स्वभावकृति.। स्वरसैन्धवी। हस्तस्वरवराटिका। हर्षपुरी।

जगदेकमल्लो भाषाङ्ग-क्रियाङ्गभेदेन लक्ष्ये दृष्टरागाणा १०१ एकोत्तरशत सम्यङ् निरूपयामास इति सगीतसुधाकारेण रघुनाथभूपेनोक्तम्। अत्रानुक्ताना ७ सप्तरागाणा लक्षणानि गवेषणीयानि।

रागाणा प्रातर्गेया सायगेया प्रहरगेयाश्चेति विभाग प्रदर्शित ।

प्रातर्गेया रागा —

देशाक्षी भैरवी शुद्धा सालगाख्या च भैरवी।
देवक्री रक्तहसी च माहुरी रागरञ्जनी ॥
एते सूर्याशतो जाता सायकाले तु निन्दिता ।
प्रगायन्ति प्रभाते य स नर सुखमेधते ॥

भरतकोश । पृ ४०५

सायंगेया रागा —

शुद्धनट्टा सालगा च नाटा शुद्धवराटिका।
वराटिका द्राविडी च देशी नागवराटिका ॥
छायावराटिका च स्यादाहर्यन्धालिका मता।
मल्लारिका तदा छाया गौडी कर्णाटिकाह्वया ॥
गौडो मालवगौडश्च रामक्री रीतिरुत्तरा।
छाया रामकृती रङ्गछाया स्वरवराटिका ॥

कर्णाटाह्व(य)बङ्गालसहिताश्चन्द्रमोऽशुजा ।
सायमेते प्रगातव्यास्तस्य श्रीरतुला भवेत् ॥
एतान्प्रात परित्यज्ये (जेत्) वृद्धिकामीह मानव ।
अनिरुक्ते तु रागाणा न वेलानिर्णय क्वचित् ॥

भरतकोश । पृ ७२०

प्रहा(ह)रगेया रागा·—

प्रहा(ह)रैकोदयादर्वाक् प्रहा(ह)रैकोदयोपरि ।
देशाक्षी भैरवी शुद्धा सालगा च प्रगीयते ॥
वराटिका तथा शुद्धा द्राविडी नागसञ्ज्ञका ।
प्रहा(ह)रोपरि गातव्या मल्लारी शाबरी तथा ॥
अन्धालिका रामकृतिश्छायानट्टा गुरुञ्जिका ।
मध्याह्नात्परतो गेया गौडरागाणि यानि च ॥
त्रियामोपरि गातव्या शुद्धसालगनाटिका ।

भरतकोशः । पृ ४०४

भरतकोशे जगदेकोक्त प्रसन्नादि· प्रसन्नान्त इति वर्णालङ्कारद्वयमुपन्यस्तम्। आवर्त —कोकिल —चक्राकार —जव —निर्दोष —पद्माकार —महावज्र·—वारिद —सदानन्द —सीर इत्येते वर्णालङ्कारा प्रतापसिंहप्रोक्ताश्चोल्लिखिता । जगदेकमल्ल एव स्वकीये ग्रन्थे बहुषु स्थलेषु प्रतापपृथिवीभुजा इति पदेन आत्मान विशिनष्टि । अत स एवाय प्रतापसिंह इति भाति ।

अस्य सङ्गीतचूडामणे प्रमाणतयोपन्यास भरतशास्त्रग्रन्थे तालपदिकाया सङ्गीतसमयसारे नैषधीयचरितकाव्यस्य विद्याधरीटीकाया च दृश्यते इति डॉ० गोडे महोदयाना सङ्गीतचूडामणिस्तस्य समयश्चेति निबन्धाज्ज्ञायते। तेन तस्मिन् काले ग्रन्थोऽय विद्वद्भिरपि अतिप्रमाणतया परिगृहीत आसीत्। एते चोपन्यासा सङ्गीतशास्त्रग्रन्थेषु अस्य ग्रन्थस्य महत्वद्योतनाय पर्याप्ता इत्यलमतिपल्लवितेन ।

अस्मिन् ग्रन्थसम्पादनकार्ये सम्प्रति रामायणविभागाध्यक्षै प्राच्यविद्यामन्दिराध्यक्षचरै श्रीमद्भिर्गोविन्दभट्टमहोदयैरादित एव महत् साहाय्यमाचरितमिति तेषा सर्वथाऽधमर्णोऽस्मि । प्राच्यविद्यामन्दिराध्यक्षै श्रीमद्भि डॉ भोगीलाल साडेसरामहोदयै तथैव साहाय्यपरम्परयाऽनुगृहीतोऽहमिति तेऽतीव धन्यवादार्हा । उपाध्यक्षै श्रीमद्भि डॉ उमाकान्त शाह महोदयैर्ग्रन्थसम्पादनार्थ पुस्तकादिप्रदानेन अनेकसूचनादिभिश्च बहुश उपकृतोऽस्मीति तेऽप्यतीव धन्यवादार्हा । विद्वद्वर्यैर्वेङ्कटरमणशास्त्रिभिस्तथा न्यायभूषण साहित्यशिरोमणिभि श्रीमद्भी राघवन् नम्बियारमहोदयै मलयलिपिलिखितस्याऽस्य ग्रन्थस्य पाठनिर्णयार्थ नैकश साहाय्यमाचरितमिति तेषामुपकारा न कदापि विस्मर्तु शक्यन्ते। अन्ते च मुद्रणालयव्यवस्थापकै· श्रीमद्भी रमणलाल पटेल महाशयैर्ग्रन्थस्यास्यातिक्लेशावह मुद्रणकार्यमपि अतिरुचिरं सम्पादितमिति तेऽपि भूरिशो धन्यवादमर्हन्ति ।

छिपवाड, अकोलकर-वाडा,
वटोदरम् । ता. ५-६-१९५८

दत्तात्रेय काशीनाथ वेलणकर

श्री ।

सङ्गीतचूडामणिः ।



हरि. (ॐ)

श्रीगणपतये नमः ।

अविघ्नमस्तु ।

देव स द्विरदाननोऽस्तु भवतामिष्टार्थससिद्धये
नि.साधारणभक्तियुक्तमनसा विघ्नौघशान्तिप्रदः ।
यस्याऽऽभाति विलोलकर्णयुगलत्रस्ता कलक्काणिनी
भृङ्गाली मदडिण्डिमध्वनिरिव व्यापारयन्ती पुर ॥ १ ॥

श्रुतिस्वरग्रामसमग्ररागवर्णक्रमस्थानघनाभिरामम् ।
सङ्गीतचूडामणिमात्मराज्यकल्पं विधत्ते **कविचक्रवर्ती** ॥ २ ॥

(अथ देशीसङ्गीतलक्षणम् ।)

देशेषु देशेषु नरेश्वराणा कुर्याज्जनानामपि वर्तते (वर्तन) या ।
गीत च वाद्यं च तथा च नृत्तं (नृत्य) देशीति नाम्ना परिकीर्तिता सा ॥ ३ ॥

(अथ गीतमाहात्म्यम् ।)

गीतस्यानुगत वाद्यं नृत्तं (नृत्य) वाद्यानुगामि यत् ।
तस्माद् गीतस्य मुख्यत्वं प्रशंमन्ति मनीषिणः ॥ ४ ॥

श्रीविष्णुरूपः खलु सामवेदस्तस्मात्समुत्पन्नमिद हि गीतम् ।
तद्देवताना पुरतः प्रगीतं भक्त्या बुधा. स्वर्गदमामनन्ति ॥ ५ ॥

पुरुषस्येन्द्रियाणा च महाभूतगणस्य च ।
गीतेनानवगीतेन जायते प्रीतिरुत्तमा ॥ ६ ॥

पुरुषे प्रीणिते साक्षात् प्रीणित पुरुषोत्तम. ।
कर्ता पालयिता हर्ता भुवनत्रितयस्य स ॥ ७ ॥

इन्द्रियप्रीणनात् प्रीतं स्यान्महाभूतपञ्चकम् ।
पृथिव्या प्रीणिताया तु प्रीणिता पर्वतादय ॥ ८ ॥

अप्सु प्रीतासु सर्वासु तोषिता सागरादय. ।
तेजसि प्रीणिते प्रीता भवेयुर्भास्करादय ॥ ९ ॥

तोषिते मारुते सम्यक् प्राणिन प्रीतिमाप्नुयु ।
आकाशे प्रीणिते प्रीतं जगत्स्थावरजङ्गमम् ॥ १० ॥

योगध्यानादिक यस्मात् सर्वलोकानुरञ्जनम् ।
तस्मादनन्तफलदं गीतं स्याद् भुक्तिमुक्तिदम् ॥ ११ ॥

ससारे सारभूतं यच्छ्रवणामृतमुत्तमम् ।
न वेत्ति गीत यो मूढस्तस्य जन्म निरर्थकम् ॥ १२ ॥

(अथ स्वरत्रैविध्यम् ।)

सप्तस्वरात् क्रमात् गीत स्वरास्ते त्रिविधा मता. ।
सचेतनोद्भवाः केचित् केचिन्निश्चेतनोद्भवा ॥ १३ ॥
उभयप्रभवाः केचिन्मुख्यास्तेषु शरीरजा ।

(अथ नादस्वरूपम् ।)

शरीर(रा)ना(न्ना)दसभूतिर्गीतं नादात् प्रवर्तते ॥ १४ ॥

नादो बिन्दुः स्वरा रागा. सभवन्ति शरीरत' ।
स्वरो गीतं च वाद्यं च तालश्चेति चतुष्टयम् ॥ १५ ॥

न सिध्यति विना नादं तस्मान्नादात्मकं जगत् ।
अग्निमारुतयोर्योगा(गाद्) भरे(वे)न्नादस्य सम्भवः ॥ १६ ॥
बिन्दुरुत्पद्यते नादान्नादान्निखिलवाङ्मयम् ।

(अथ नादशब्दनिष्पत्तिः ।)

नकारः प्राण इत्युक्तो दकारो वह्निरुच्यते ॥ १७ ॥

अर्थोऽयं नादशब्दस्य सङ्केतात् परिकीर्तित ।
स च पञ्चविधो नादो **मतङ्ग**मुनिसम्मत ॥ १८ ॥

(अथ नादप्रकारा ।)

अतिसूक्ष्मश्च सूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः ।
अतिसूक्ष्मो भवेन्नाभौ हृदि सूक्ष्म प्रकाशते ॥ १९ ॥

पुष्टोपि युज्यते कण्ठे त्वपुष्टि(ष्ट)श्शिरसि स्मृत ।
कृत्रिमो मुखदेशे तु स्थानदेनन (भेदेन) भासते ॥ २० ॥

॥ श्रीः ॥

|| श्री ||

(अथ प्रबन्धप्रकरणम् ।)

एक एव प्रबन्धश्चेत् प्रकीर्णो वर्ज्य(र्ण्य)ते बुधै ।
उद्देशस्तु प्रबन्धानामधुना क्रियते मया ॥ २१ ॥

प्रथम(मो) मातृकाख्य. स्यात् पञ्चतालेस्व (श्व)रा (र) स्ततः ।
गद्य वृत्तं दण्डक स्यादार्या कन्दस्तत परम् ॥ २२ ॥

हयलीलेभलीला च विजयो हरिपूर्वक. ।
तत क्रौञ्चपदाभिख्य कलहसस्ततो भवेत् ॥ २३ ॥

तत. सिंहपदश्च(श्च)क्रवालश्च जयमालिका ।
सिंहविक्रमनामाथ कथिता स्तवमञ्जरी ॥ २४ ॥

गाथा द्विपथकश्चैव मल्लिका द्विपदी थ(घ)ट' ।
चर्चरी बन्ध(द्ध)नी चैव तत' प्रोक्ता चतुष्पदी ॥ २५ ॥

वस्तुनामप्रबन्धस्य करण स्वरपूर्वकम् ।
ततश्च पाटकरण बन्धारयं (ख्य) करणं तत. ॥ २६ ॥

अन्यत्स्वरपदाख्य च करणं परिकीर्तितम् ।
तथान्यच्चित्रकरण करणं तेत्र (न) पूर्वकम् ॥ २७ ॥

करण मिश्रपूर्व च वर्तन्यथ विवर्तनी ।
स्वरार्थ एला ढोकी (ढेङ्की) च तथैव ध्वनिकुट्ट(ट्टि)नी ॥ २८ ॥

डों(झों)बडो लाभको (लम्भको) रासश्चैकताल्यङ्कता (चा) र(रि)णी ।
चतुरंग (रङ्गः) स्वराङ्गश्च त्रिभङ्गिस्तु विचित्रक. ॥ २९ ॥

ततो रागकदम्बः स्यात् भवेत्तालार्णवस्ततः ।
रससन्दोहसंज्ञश्च मण्डनश्च चतुर्मुखः ॥ ३० ॥

तत. स्याद्वर्णसरकस्ततो हरविलासक
*पञ्चहस्तिस्तत. प्रोक्त तत' पञ्चानको (नो)भवेत् ॥ ३१ ॥

श्रीरङ्गो गदितस्तस्माद् उमातिलकनामक ।
स्यात् श्री (च्छ्री) विल(ला)स शरभलीलोऽन्यस्सिंहलीलक. ॥ ३२ ॥

विजयश्च जयश्रीश्च तथान्यो हर्षवर्धन ।
श्रीवर्धन प्रतापादिवर्धनोऽथ मनोरम ॥ ३३ ॥

प्रमोदश्च ततोऽप्यन्यौ द्वौ सुदर्शनकन्दुकौ ।
आमोदोऽकन्धुश्चैव (ङ्कध्वनिश्चैव) ततस्त्रिपथकाभिध. ॥ ३४ ॥

अभिनन्द शुक शारी रणरङ्गोऽथ नन्दन ।
हसलीलोऽथ वर्ण. स्यात् सिहविक्रान्तसञ्ज्ञकः ॥ ३५ ॥

शुकचञ्चुचै(श्चै)कपादो नत्त(र्त)नस्तदनन्तरम् ।
वीरश्रीर्नत्त(र्वर्त)नानन्दो ललितो हसक.(त) पदम् ॥ ३६ ॥

नन्दश्च मङ्गलाचारो धवलो मङ्गलाभिध ।
वदनो(न')त्सबन्धा(सपडा)ख्यश्च चर्या राहसिका (रासकिका) तथा ॥३७॥

नि(त्रि)पदी षट्पदी चैव मोळ(ल) (ट्ट)श्चो(ट्टो घो)ल्लरिका तथा ।
मो(लो)ल्लिर्दन्तीति वस्तूनामुक्तमेकोत्तरं शतम् ॥ ३८ ॥

(अथ मातृकाप्रकाराः)

दिवा(व्या) च मानुषी चान्या दिव्यमानुषिका व(प)रा ।
दिव्या सस्तुतया वाचा दिव्यैस्तालैर्विभूषिता ॥ ३९ ॥

मानुषी प्राकृतोक्त्यैव तालैर्देशीगतैर्भवेत् ।
भाषावैचित्र्यसंयुक्ता देशी या दिव्यमानुषी ॥ ४० ॥

मार्गदेशीगतैस्तालैर्मातृका परिगीयते ।
वेदान्तसिद्धान्तसमस्तमन्त्र(न्त्रा)गन्धर्ववृन्दै. सह नारदाद्यै. ।
वेदाश्च सर्वे परितोषभाजो भवन्ति गीते खलु मातृकायाः ॥ ४१ ॥

---

* पञ्चभङ्गी इति पाठ. पञ्चहस्ति. इत्यपेक्षया साधु । रत्नाकरेऽपि अयमेव पाठोऽस्ति

श्री ।

(अथ तालप्रकरणम् ।)

विष्णुं लोकगुरु प्रणम्य शिरसा सन्मार्गसन्दर्शकं
कीर्तिप्रीतिकरं जनस्य लघुना कामेन कामप्रदम् ।
सेव्य स्याद्यतिभिर्द्रुतप्लुतपदन्यासाप्तलोकत्रय
तालाना कथयामि लक्षणमह पूर्वोक्तशास्त्रक्रमात् ॥ ४२ ॥

(अथ तालशब्दनिष्पत्ति ।)

तालशब्दस्य निष्पत्ति प्रतिष्ठार्थो(र्थे)न धातुना ।
गीतं वाद्यं च नृत्त (त्य) च भाति ताले प्रतिष्ठिन (तम्) ॥ ४३ ॥

(अथ तालप्राणा ।*)

ताल. कालस्य यन्मान मापा–(मात्राजं) हि क्रियाकृतम् ।

(अथ जातयः ।)

त(च)तुरश्रस्ततस्त्र्यश्रो मिश्र· खण्डाभिधस्तथा ॥ ४४ ॥

चतुर्विधो भवेत्तालस्तत्स्वे(स्व)रूपं निरूप्यते ।
तत्र चच्चत्पुटः प्रोक्तश्चतुरश्रो(स्रो) मनीपिभि ॥ ४५ ॥

स त्रिधैककलः पूर्वं(र्वो) द्विकलश्च चतुष्कलः ।
तथा चाचपुटस्त्र्यश्र(स्र)स्तस्य भेदा भवन्ति षट् ॥ ४६ ॥

गुरुत्रयात् समारभ्य द्विगुणं द्विगुणं क्रमात् ।
यावत् षण्णवतिस्तस्मिन्नेवं षड्भेदका. क्रमात् ॥ ४७ ॥

युग्मौजमिश्रणामिश्रस्ताल. प्रोक्तो विचक्षणै. ।
विश्लिष्टो(ष्टै र)प्यव(वि)श्लिष्टैस्तालङ्गैर्य(र्यो) द्रुतादिभिः ॥ ४८ ॥

कालो मार्ग क्रियाङ्गानि ग्रहो जाति कला लयः ।
यति प्रस्तारकश्चेति तालप्राणा दश स्मृता ॥ स दर्पणम् श्लो ६३१

क्रियते बहुभङ्गीभि· स ताल खण्डसञ्ज्ञक· ।

(अथ मात्रालक्षणम् ।)

लघ्वक्षराणा पञ्चाना मानमुच्चारणे हि यत् ॥ ४९ ॥

तत्प्रमाणा परिज्ञेया मात्रा तालगता बुधै ।
(कला च) सर्वमाख्योय(सैव मार्गे यां) ध्रुवशब्देन चोच्यते ॥५०॥

(अथ मार्गा ।)

दक्षिणो वार्त्तिकश्चित्रस्ततश्चित्रतरो मत ।
तथा चित्रमत(तम)श्च स्यादतिचित्रतमो(मः) पर· ॥ ५१ ॥

षडेवं कथिता मार्गास्तत्स्वरूपं निरूप्यते ।
अष्टमात्र (त्रा) कला ज्ञेया मार्गे दक्षिणसञ्ज्ञके ॥ ५२ ॥

वार्तिके स्या(स्याच्)चतुर्मात्रा कला चित्रे द्विचि(मा)त्रिका ।
मात्रा चित्रतरे च स्यादर्ध्दा चित्रतमे तत ॥ ५३ ॥

अतिचित्रतमे मार्गे कला तु द्रुतसञ्ज्ञिता ।

(अथ ग्रहा· ।)

ग्रहस्त्रिधा समोऽतीतस्तथाऽनागत इत्यपि ॥ ५४ ॥

गीते वाद्ये च नृत्ते(त्ये) च ... .(सममेव) प्रवर्तते ।
यस्ताल स च विज्ञेय समग्रहसमाह्वय· ॥ ५५ ॥

किञ्चिद्गीते समारब्धे वाद्ये नृत्तेऽथवा पुन ।
ग्रहणं यत्र तालस्य सोऽतीतग्रह इष्यते ॥ ५६ ॥

योऽलंकारेण गीते स्यात् तकारेण च वादने ।
नृत्येऽङ्गवर्त्तनैस्सार्ध्दं स तालोऽनागतग्रह ॥ ५७ ॥

(अथ लय ।)

तालान्तरालवर्त्ती य· कालोऽसौ लयनाह्वय· ।
त्रिविधः स च विज्ञेयो द्रुतो मध्ये(ध्यो) विलम्बितः ॥ ५८ ॥

(अथ यति· ।)

लययानयति सम्यक् कथित(ता)**दत्तिवा(ला)**दिभि· ।
समा स्रोतोवहाख्या च गोपुच्छा चेति सा त्रिधा ॥ ५९ ॥

(अथ प्रस्तार ।)

प्रस्तारे(ता)लसम्बन्धि ह्यक्षर(रं)स्याच्चतुर्विध(धम्) ।
सञ्ज्ञया तत्परिज्ञेय द्रुतं लघु गुरु प्लुतम् ॥ ६० ॥

प्रत्येकं च द्रुतादीना भवेत् पर्यायपञ्चकम् ।
अर्धमात्रं द्रुत व्योम व्यञ्जनं बिन्दुकं तथा ॥ ६१ ॥

मातृ(त्रि)क सरल ह्रस्वं लघु व्यापकमित्यपि ।
द्विमात्रिक कला वक्रं गुरु दीर्घमिति स्मृतम् ॥ ६२ ॥

सामोद्भवं प्लुतं दीप्त तथा त्र्यंश त्रिमात्रिकम् ।
द्रुते स्याद्देवता शम्भुर्लघुन्यद्रिपतेः सुता ॥ ६३ ॥

गौरा(री)शिवौ च गुरुणी(णि) प्लुते ब्रह्मादयस्त्रय· ।
अनु द्रुतादिनिष्पन्नॉस्तालान् वक्ष्यामि साम्प्रतम् ॥ ६४ ॥

(अथ एकोत्तरशतताला· ।)

चंर्चत्पुट·(चच्चत्पुटः)चाचपुटः षट्पिका(ता)पुत्रकस्तथा ।
संपक्केष्टाक उत्(द्)घट्ट आदितालश्च दर्पण ॥ ६५ ॥

चच्चरी सिहलीलश्च कन्दर्प· सिंहविक्रम(म·) ।
श्रीरङ्गो रतिलीलश्च रङ्गतालो(ल·)परिक्रम· ॥ ६६ ॥

प्रत्यङ्गो गजलीलश्च त्रिभिन्नो वीरविक्रमः ।
हंसलीलो वर्णभिन्नो राजचूडामणिस्तत ॥ ६७ ॥

*रङ्गोद्योतो . .रङ्गप्रदीपक· ।
हंसनाद· सिंहनादो मल्लिकामोदसंज्ञकः ॥ ६८ ॥

---

*रङ्गोद्योतो राजताल सिहविक्रीडितस्तथा । वनमाली वर्णतालस्ततो रङ्गप्रदीपकः ॥
अय पाठो मूले नास्ति । खण्डितो विद्यते स च सङ्गीतमकरन्दात् सशोध्य स्थापित ।

भवेच्छरभलीलश्च रङ्गाभरण एव च ।
भवेत्तुरंगलील स्यात्तत स्यात् सिंहनन्दनः ॥ ६९ ॥

जयश्रीर्विजयानन्द. प्रतितालो द्वितीयक. ।
मकरन्द कीर्तितालो विजयो जयमङ्गल. ॥ ७० ॥

राजविद्याधरो मट्ठ(ट्टो)जयताल कुडुर्कक. ।
ततो नि.सारक(नि.सारुक) क्रीडा त्रिभङ्गि कोकिलप्रियः ॥ ७१ ॥

श्रीकीर्तिर्बिन्दुमालि(ली)श्च (च)समतालश्च नन्दन. ।
उदीक्षणो मड्डि(ट्टि)का (मण्ठिका) च ढेङ्किका वर्णमड्डि(ट्टि) (ण्ठि)का ॥ ७२ ॥

अभिनन्दोऽन्तरक्रीडा(ड) मल(ल्ल)तालश्च दीपका:(क.) ।
अनङ्गतालो विषमो नान्दीकुमुदकन्दुक(का) ॥ ७३ ॥

एकताल(ली) चे(च)क्र(कं)कालश्चतुस्तालश्च(ली च) नों(डों) (त्सों)बिका ।
अभङ्गो राजवंकालस्तथैव लघुशेखरः ॥ ७४ ॥

प्रतापशेखरश्चान्यो जगत्झम्पश्चतुर्मुख ।
झम्पार्क (क.) प्रतिमङ्खश्च तथा तालस्तृतीयक· ॥ ७५ ॥

तस्मादुपरि विज्ञेयो वसन्तो ललितो रति. ।
करणाख्या(ख्यो) यतिश्चैव* राजनारायणस्तत ॥ ७६ ॥

मदनश्चैव विज्ञेय पार्वतीलोचनस्तत· ।
ततो गारुकि(गि)तालः स्यात्तत· श्रीनन्दनो जयः ॥ ७७ ॥

लीला विलोकितश्चान्यो ललितप्रिय एव वा ।
जनकश्चैव विज्ञेयो लक्ष्मीशो रागवर्धनः ॥ ७८ ॥

बद्धा(न्धा)पण इति ज्ञेयो(य·) तालस्यैकशतं बुधैः ।
चतुरश्रादितालानामिदानी कथयाम्यहम् ॥ ७९ ॥

प्रस्तारसहित(तं) लक्ष्यं तद्भेदाश्च पृथग्विधा. ।

---

*'षट्तालो वर्द्धनस्तथा। तालो वर्णयतिश्चैव' अयं पाठो मूले भ्रष्टः। स च सङ्गीतमकरन्दात् संशोध्य स्थापित ।

॥ श्रीः ॥

[१] ताले चच्चत्पुटे ज्ञेय गुरुद्वन्द्वं लघुप्लुतम् ।

ऽ ऽ । 2 चच्चपु(त्पु)टम्(ट.) । [८]‡

[२] गुरु लु(र्लै)घू गुरुश्चैव भवेच्चाचपुटाभिदे (धे) ॥ ८० ॥

ऽ । । ऽ चाचपुटम्(ट.) । [६]

[३] पलगा गलपाश्चैव षट्पितापुत्रकस्तथा ।

2 । ऽ ऽ । 2 षट्पितापुत्रकम् (कः) । [१२]

[४] मगण स्यात् प्लुताद्यन्तं(न्तो) सपक्केष्टाकसञ्ज्ञके ॥ ८१ ॥

2 ऽ ऽ ऽ 2 सपक्केष्टम् (ष्ट.) । [१२]

[५] उद्घट्टे मगणस्त्वेक ,

ऽ ऽ ऽ उद्घट्ट. । [६]

[६] आदितालो लघु स्मृत. ।

। आदिताल (ल.) । [१]

[७] दर्पणे स्यात् द्रुतद्वन्द्वं गुरुश्चैक. प्रकीर्तितः ॥ ८२ ॥

० ० ऽ दर्पण (ण.) । [३]

[८] अष्टकृत्वस्तु चच्च(र्च)र्यां विरामान्तौ द्रुतो (तौ) लघु. ।

००’। ००’। ००’। ००’। ००’। ००’। ००’। ००’। चच्च(र्च) री । [१८]

[९] सिंहलीले विधातव्यं लघ्वाद्यन्त (न्तं) द्रुतत्रयम् ॥ ८३ ॥

। ० ० ० । सिंहलीला (ल.) । [३½]

[१०] द्रुतद्वय यकारश्च कन्दर्पः परिकीर्तित ।

० ० । ऽ ऽ कन्दर्प (र्पं.) । [६]

[११] सिंहविक्रमताले स्युर्मगणो ल. पला (लौ) गपौ ॥ ८४ ॥

ऽ ऽ ऽ । 2 । ऽ 2 सिंहविक्रम (मः) । [१६]

---

‡ तालप्रकरणे सव्यभागे प्रतिताल अन्ते लिखिता तालमात्रासख्या ज्ञेया । वामभागे च तालक्रमाङ्को ज्ञेय ।

[१२] श्रीरङ्गसञ्ज्ञके ताले सगणो ल. (ल)प्लुतौ मतौ ।
।।ऽ। 2 श्रीरङ्गं (ङ्गः) । [८]

[१३] रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम् ॥ ८५ ॥
।।ऽऽ रतिलीला (ल) । [६]

[१४] चत्वारो रङ्गताले स्यु द्रु (द्रु)ता गुरुस्त(र)तः परम् ।
० ० ० ० ऽ रङ्गताल (लः) । [४]

[१५] परिक्रमे द्रुतद्वन्द्व यगणस्तदनन्तरम् ॥ ८६ ॥
० ० । ऽऽ परिक्रमं (म) । [६]

[१६] प्रत्यङ्गसञ्ज्ञके ताले मगण (ण) स्याल्लघुद्वयम् ।
ऽऽऽ ।। प्रत्यङ्गं (ङ्ग') । [८]

[१७] लचतुष्क विरामान्तं गजलीले प्रकीर्तितम् ॥ ८७ ॥
।।।।' गजलीला (ल.) [४½]

[१८] लघुर्गुरु प्लुतश्चैव त्रिभिन्ने परिकीर्तिता (ताः) ।
।ऽ 2 त्रिभिन्न (न्न) । [६]

[१९] * (वीरविक्रमताले तु) लौ द्रुतौ गुरुरेव च ॥ ८८ ॥
।। ० ० ऽ वीरविक्रमं (मः) । [५]

[२०] सविरा —— (रामं) लघुद्वन्द्वं ताले स्याद्धंसलीलके ।
।।' हंसलीला (लः) [२½]

[२१] वर्णभिन्नाभि–(धे) ताले द्रुतद्वन्द्व लघुर्गुरु ॥ ८९ ॥
० ० । ऽ वर्णभिन्न (न्नः) [४]

[२२] राजचूडामणौ ताले द्रुतौ नश्च द्रुतौ लगौ ।
० ० ।।। ० ० । ऽ राजचूडामणिः । [८]

[२३] रङ्गोद्योतन(क)ताले तु मगणौ (णो)लप्लुतावपि ॥ ९० ॥
ऽऽऽ। 2 रङ्गोद्योतकं (क) । [१०]

* वीरविक्रमताले तु' इति मूले नास्ति ।

[२४] लगौ (गोलौ) द्रुत (तो) गलो (लौ)पश्च राजताले* प्रकीर्तिता (ताः)।
S । । ० S । 2 (?)
(गपौ द्रुतौ गलौ पश्च राजताले प्रकीर्तित । इति सं. मकरन्दे)
(S 2 ० ० S । 2) राजतालं (ल) । [१२]

[२५] द्विर्ल. (र्लि) पा (पो) गा (गो) लगौ पश्च सिंहविक्रीडिते लपौ ॥९१॥
। । 2 S । S 2 । 2 सिंहविक्रीडितं (त) । [१७]

[२६] वेदद्रुता लौ द्रुतौ–ग (च) वनमाली (लि)नि गस्तथा ।
० ० ० ० । । ० ० S वनमालि (ली) । [७]

[२७] गुरुर्लघू द्रुतौ गश्च वर्णे स्याच्चतुरस्र(श्र)के ॥ ९२ ॥
S । । ० ० S चतुरश्रवर्णं (र्णे) । [७]

[२८] लघुर्द्रुतौ लघू गश्च त्र्यश्रवर्णे प्रकीर्तिताः ।
। ० ० । । S त्र्यश्रवर्णं (र्णः) । [६]

[२९] प्रतितूर्यं विरामान्तं मिश्राख्ये द्वादश द्रुताः ॥ ९३ ॥
प्लुतौ (तो) गुरुद्वं (द्वे) तद्वन्द्वं गद्वयं ल (लो) गुरुस्तथा ।
००००' ००००' ००००' 2 S ० ० S S । S (?) [१९$\frac{३}{४}$]

[३०] रङ्गप्रदीपत (ता)ले स्यात् तगणा (णो) गप्लुतौ यदि ॥ ९४ ॥
S S । S 2 रङ्गप्रदीप. । [१०]

[३१] लप्लुतौ द्रुतयुग्मं पो हंसनादे प्रकीर्तिताः ।
। 2 ० ० 2 हंसनादं (द.) [८]

[३२] यगणो लो (लो) गुरुश्चैव सिंहनादे निरूपिताः ॥ ९५ ॥
। S S । S सिंहनादं (दः) । [८]

[३३] ताले स्यान्मल्लिकामोदे लद्वयं खचतुष्टयम् ।
। । ० ० ० ० मल्लिकामोदं (दः) । [४]

* (१) राजतालो गपौ दौ च गलौ प्लुत । स० रत्नाकर ता. अ श्लो. २६८ ॥ (२) राजताले क्रमात्प्रोक्ता गपौ दौ गलपास्तथा । स० चिन्तामणि. ॥ इति १२ मात्रात्मक. सर्वसंमतोऽयं राजताल. ।

[३४] लघुद्रु(द्रु)तचतुष्कं लौ स्याता शरभलीलके ॥ ९६ ॥

। ० ० ० ० । । शरभलील । [५]

[३५] तगणाल्लप्लुतौ कार्यौ रङ्गाभरणसञ्ज्ञके ।

ऽ ऽ । । 2 रङ्गाभरणं (ण) । [९]

[३६] तुरङ्गलीले ताले स्या (स्याद्) द्रुतद्वन्द्वं लघुस्ततः ॥ ९७ ॥

० ० । तुरङ्गलीलः । [२]

[३७] तपो (पौ) लगौ द्रुतौ गौ ल. पलपा गश्च लद्वयम् ।

*नि.शब्दं लचतुष्क च ताले स्यात् सिहनन्दने ॥ ९८ ॥

ऽ ऽ । 2 । ऽ ० ० ऽ ऽ । 2 । 2 ऽ । । + सिहनन्दनं (नः) । [३२]

[३८] ग (गो) लौ ला (लो)न्त्यगुरुश्चैको जयश्रीरिति गण्यते ।

ऽ । । । ऽ जयश्री (श्री.) । [७]

[३९] भवेयुर्विजयानन्दे लद्वत् (द्वयं) गुरवस्त्रयः ॥ ९९ ॥

। । ऽ ऽ ऽ विजयानन्दं (न्दः) । [८]

[४०] लो द्रुतौ प्रतिताले स्यात्

। ० ० प्रतितालं (लः) । [२]

[४१] द्रुतौ नश्च द्वितीयके ।

० ० । । । द्वितीयकं (कः) । [४]

[४२] मकरन्दे द्रुतद्वन्द्वं लघुत्रयमथो गुरू ॥ १०० ॥

० ० । । । ऽ ऽ मकरन्दं (न्द) । [८]

[४३] गलै पगौ लपौ श्चै (चै)त्र कीर्तिताले प्रकीर्तिता (ताः) ।

ऽ । 2 ऽ । 2 कीर्तितालं (लः) । [१२]

[४४] प्लुतो गश्च प्लुतो लश्च ताले विजयसंज्ञके ॥ १०१ ॥

2 ऽ 2 । विजयतालं (लः) । [९]

---

* निःशद्वं लचतुष्कं नाम चत्वारो लघव अशब्दा + (लचतुष्कं यावन्न विराम ।) अथवा सङ्गीतरत्नाकरे च ४ ×इति ‘ चतुर्लघु नि शब्दम् ’ इत्यर्थक सङ्केतो द्योतितस्तेन उपरिनिर्दिष्टोऽर्थ. स्फुट. ।

[४५] सकारश्च सकारश्च जयमङ्गलनामि (म)नि ।
।।S ।।S जयमङ्गल (ल) [८]

[४६] लघुश्च गो द्रुतौ ताले राजविद्याधराभिधे ॥ १०२ ॥
। S ० ० राजविद्याधरं (र)। [४]

[४७] सकारान्मड्ड(ट्ट)ताले स्यात् कल्पितं लचतुष्टयम् ।
।।S ।।।। मड्ड[ट्ट]तालं (ल)। [८]

[४८] जगणो लौ द्रुतौ पश्च जयताले प्रकीर्तिता (ता) ॥ १०३ ॥
।S। ।। ० ० 2 जयतालं (लः) [१०]

[४९] द्रुतद्वन्द्व लघुद्वन्द्वं भवेत्ताले हुड्डुक्के ।*
० ० ।। हुड्डुक्कतालं (लः)। [३]

[५०] लघुद्वयं विरामान्तं ताले नि सारुके भवेत् ॥ १०४ ॥
।।' नि सारुकं (क)। [२३/४]

[५१] द्रुतद्वयं विरामान्तं क्रीडाताले प्रकीर्तितम् ।
० ०' क्रीडातालं (लः)।। [१३/४]

[५२] लघुद्वन्द्व गुरुद्वन्द्वं त्रिभङ्गिमि(रि)ति कथ्यते ॥ १०५ ॥
।।SS त्रिभङ्गिताल (लः)। [६]

[५३] कोकुल (कोकिल) प्रियताले स्यु' क्रमात् गुरुलघुप्लुता. ।
S। 2 कोकु (कि)लप्रियताल (लः)। [६]

[५४] श्रीकीर्तिसञ्ज्ञके ताले गुरुद्वन्द्व लघुद्वयम् ॥ १०६ ॥
SS।। श्रीकीर्तितालं (ल.)। [६]

[५५] चत्वारो बिन्दवो गुर्वोर्मध्ये स्युर्बिन्दुमालिनि ।
S ० ० ० ० S बिन्दुमालिनी (ली)। [६]

[५६] समताले लघुद्वन्द्व विरामान्त(न्त) द्रुतद्वयम् ॥ १०७ ॥
।।०'(।।० ०') समताल (ल)।[३३/४]

---

* असौ कुड्डुक्काऽभिध । कुड्डुक्क इत्यपरनामा वा ।

[५७] लो (लौ) द्रुतौ च प्लुतश्चान्ते ताले स्यान्नन्दनाभिदे (धे) ।
। । ० ० **2** नन्दनतालं (ल) । [६]

[५८] *दक्षिणे स्याल्लघुद्वन्द्व गुरुरेकस्ततः परम् ॥ १०८ ॥
। । ऽ दक्षिणतालं (ऋ) । [४]

[५९] मड्डि (ट्टि) (ण्ठि)काया विधातव्या गुरुर्बिन्दु (न्दू) प्लुतः क्रमात् ।
ऽ ० ० **2** मड्डिकातालं (ल.) । [६]

[६०] ढोङ्किका जगणो न स्यात्(ढेङ्किका रगणेन स्यात्)केषाचित् सैव योजना ॥ १०९ ॥
ऽ । ऽ ढो(ढे)ङ्किकाताल (ल) । [५]

[६१] लौ ब्रिन्दू लश्च बिन्दु (न्दू)श्च (च) विज्ञेया वर्णमड्डि(ट्टि)का ।
। । ० ० । ० ० वर्णमड्डि [ट्टि] कातालं (लः) । [५]

[६२] ल्द्वन्द्व बिन्दुयुग्मं च गुरुश्चैवाभिनन्दने ॥ ११० ॥
। । ० ० ऽ अभिनन्दनतालं (ल.) । [५]

[६३] विधातव्या ऽन्तरक्रीडा विरामान्त(न्तं) द्रुतत्रयम् ।
० ० ०’ अन्तरक्रीड । [१$\frac{3}{4}$]

[६४] मल्लताले ऽ ब्धिलघवो विरामान्तद्रुतत्रयम् ॥ १११ ॥
। । । । ० ०’(० ० ०’)मल्लतालं (ल॰) [५$\frac{3}{4}$]

[६५] द्रुतद्वयं लघुद्वन्द्व गुरुद्वन्द्व च दीपके ।
० ० । । ऽ ऽ दीपकताल (लः) । [७]

[६६] लघुप्लुतौ सकारश्च स्यादनङ्गाभिधे पुनः ॥ ११२ ॥
। **2** । । ऽ अनङ्गतालं (लः) । [८]

[६७] वेदद्रुता विरामान्ता द्वौ वारौ (द्विवारं) विषमे मताः ।
० ० ० ०’ (० ० ० ०’ ० ० ० ०’) विषमतालं (ल.) । [४$\frac{१}{२}$]

[६८] श्रन्दि(नान्दी)ताले समुद्दिष्टा लघु बि(बिं)न्दू लघु(घू) गुरुः (रू) ।
॥ ११३ ॥

---

* उद्दीक्षणतालापरपर्यायोऽयम् ।

। ० ० । ऽ ऽ अन्दि (नान्दी)तालं (ल॰) ।

(। ० ० ।। ऽ ऽ नान्दीताल ।) [८]

[६९] कुमुन्द(द) (मुकुन्द ?) सज्ञके ताले लघु बि(बि)न्दू लधुर्गुरु ।$

। ० ० । ऽ कुमुदतालं (लः) । [५]

[७०] लघुद्वन्द्वं सकारेण कन्दुकः परिकीर्तितः ॥ ११४ ॥

।। ।।ऽ कन्दुकतालं (ल.) । [६]

[७१] एकेनैव द्रुतेन स्यादेकताले(ली)ति सञ्ज्ञया ।

० एकताल (ल) । (एकतालीताल) [½]

चतुर्विध(ध.) स्यात् कङ्काल. †खण्ड पूर्ण. समा[मोऽ]समः ॥ ११५ ॥

[७२] पूर्णो द्रुतचतुष्केण गुरुणा लघुना क्रमात् ।

० ० ० ० ऽ । पूर्णतालं(ल॰) । [५]

[७३] चतुस्ताले गुरु. पूर्व ततो बिन्दुत्रयं भवेत् ॥ ११६ ॥

ऽ । (?) ० ० ० (ऽ ० ० ०) चतुस्तालं (लः) । [३½]

[७४] विर(रा)मान्तौ लघु(लघू) द्विश्चेत् §सोंबिकीति प्रकीर्तिता । [?]

।।' ।।' त्सों (सों) (डों)बिकताल (लः) । [४½]

*अमुमेव वदन्त्यन्ये तालं बन्धा(द्धा)पणाभिधम् ॥ ११७ ॥

[७५] अभङ्गताले कर्तव्या(व्यं) लघ–त्रे ‡ त्रिमात्रिका(कम्) ।

।।। 2 अभङ्गतालं (ल) । [६]

$ अयमेव कुमुन्द इति नन्दी (भरतार्णवकर्ता) ।
मुकुन्दसंज्ञिके ताले लघुर्बिन्दुर्लघुर्गुरु । सं० मकरन्दे ।

† खण्डसमाऽसमेति तालत्रयाणा लक्षणानि अत्र न दत्तानि यतस्त्रयो भेदा न परिगणिता ।

§ असौ मूले (मलयालम् लिप्या) डो अथवा सो इति पठ्यते ।
सङ्गीतरत्नाकरादिषु ग्रन्थेषु 'डोम्बुली' इत्यपरनामासौ लक्षणेन परिचीयते ।

* अमुमेव वदन्त्यन्ये ताल वर्धापणाभिधम् इति पाठ साधु ।
ताले वर्धापणे ज्ञेयं लघूना च चतुष्टयम् ।
।।।। वर्धापणताल. । (सुधाकलशे)

‡ मूलपुस्तके (मलयालम् लिप्या) 'लघण्डेत्रे' इति पाठो दृश्यते तत्र 'लघुत्र्यन्ते' इति चेत् साधुपाठ ।

[७६] ज(र)गणाद् बिन्दुयुग्मेण(न) राजवता(वङ्का)ल इष्यते ।
ऽ । ऽ ० ० राजवंका(वङ्का)लतालं (ल.) । [६]

[७७] एकेन स्स(स)विरामेण लघुना लघुशेखर ॥ ११८ ॥
।' लघुशेखरतालं (ल) । [१$\frac{1}{4}$]

[७८] प्रतापशेखरे त्र्यंशा(शो) (त्र्यङ्गाद्) विरामान्तद्रुतद्वयम् ।
2 ० ०' पतापशेखरतालं (ल) । [४$\frac{1}{4}$]

[७९] जगज्झम्पे गुरुश्चैको विरामान्तद्रुतद्वयम् ॥ ११९ ॥
।(ऽ) ० ०' जगज्झम्पताल (लः) । [३$\frac{1}{4}$]

[८०] चतुम्मु(र्मु)खाभिदे(धे) ताले जगणानन्तर प्लुत. ।
। ऽ । 2 चतुर्मुखतालं (ल) । [७]
त्रिमात्रिक. पुनः कैश्चिदयमेव प्रकीर्तित ॥ १२० ॥
2 चतुर्मुखताल(ल.) । [३]

[८१] व्योमद्वयं विरामान्तं लश्च झंभा(झम्पा)भिधे भवेत् ।
० ०' (० ०' ।) झम्पतालं (ल॰) । [२$\frac{1}{4}$]

[८२] सगणो भगणो *वापि प्रतिमड्डे(ण्ठे) बुधै स्मृत ॥ १२१ ॥
। । ऽ ऽ । । प्रतिमट्ठ(ण्ठ) ताल (ल.) । [८]

[८३] तृतीयताले बिन्दौ (न्दु.) स्याद् विरामान्त द्रुतद्वयम् ।
। ० ० ०'(') (० ० ०') तृतीयतालं (ल) । [१$\frac{3}{4}$]

[८४] ‡ वसन्तताले कर्तव्यौ ग(न) गणो न(म) गणस्ततः ॥ १२२ ॥
। । । ऽ ऽ ऽ वसन्ततालं (ल॰) । [९]

[८५] ताले ललितसंज्ञे स्याद् द्रुतद्वन्द्वं लघुर्गुरू (रुः) ।
० ० । ऽ ऽ (० ० । ऽ) ललिततालं (ल.) । [६] [४] [१]

---

* अत्र 'वापि' इत्यस्य 'चापि' इत्यर्थ स्वीकृत । अत सगणश्च भगणश्च इति पाठो बोध्यो ग्रन्थान्तरप्रमाणात् ।

‡ मूलपुस्तके अस्य अस्पष्टानि अक्षराणि ।

[८६] रतिताले लघु कार्या(र्यं) त(स्त)तश्चैको गुरु स्मृत ॥ १२३ ॥

। ऽ रतिताल (ल) । [३]

[८७] ताले करणयत्याख्ये ज्ञेयं बिन्दुचतुष्टयम् ।

० ० ० ० करणयतिताल (ल) । [२]

[८८] षट्ताले(ल)सञ्ज्ञके ताले बिन्दुषट्क निरूप्यते ॥ १२४ ॥

० ० ० ० ० ० षट्ताल (ल) । [३]

[८९] खण्डने (वर्द्धने) बिन्दुयुगल तत कायो (र्यो) लघु. प्लुत. ।

० ० । 2 बन्धनतालं (ल) (वर्धनतालः) । [५]

[९०] वर्णयत्यभिधे ताले लघुद्वन्द्व प्लुतद्वयम् ॥ १२५ ॥

। । 2 2 वर्णयतितालं (ल.) । [८]

[९१] राजनारायणे बिन्दुद्विती(त)यं जगणो गुरु । [८]

० ० । ऽ । ऽ ऽ (ऽ) राजनारायणतालं (ल.) । [९] [८]

[९२] द्रुतद्वन्द्वं गुरुश्चैको मदने परिकीर्तितः ॥ १२६ ॥

० ० ऽ मदनताल (लः) । [३]

[९३] पार्वतीलोचने वृत्तौ(त्ते) लौ द्रुतौ तनभा' क्रमात् ।

० ० । । ० ० ऽ ऽ । । । । ऽ । । पार्वतीलोचनं (न.) । [१६]

अथवा मगणो लश्च गुरुद्वन्द्वं द्रुतद्वयम् ॥ १२७ ॥

ऽ ऽ ऽ । ऽ ऽ ० ० पार्वतीलोचनः [१२]

[९४] शरा(गा)रुकिः कथ्यते प्राज्ञै वि(र्वि)रामान्तश्चतुर्द्रुतं (त) ।

० ० ० ०' शा(गा)रुकितालं (लः) । [२½]

[९५] श्रीनन्दनस्य तालस्य म(भ)गणात् प्लुत इष्यते ॥ १२८ ॥

ऽ । । 2 श्रीनन्दनतालं (ल.) । [७]

[९६] जये स्याज्जगणो लश्च बिन्दुयुग्म प्लुतस्तथा ।

। ऽ । । ० ० 2 †जयतालं (लः) । [९]

---

† जयतालो द्वि पठित (तालक्रमाङ्के ४८ तथा ९६) परं उभयत्र मात्राभेदाद् भिन्नः ।

[९७] बिन्दुर्लघुः प्लुतश्चैव लीलाताले प्रकीर्तितः ॥ १२९ ॥

० । 2 लीलाताल (ल) । [४½]

[९८] विलोकिते लघुर्वत्र(क्र) शून्ययुग्म तत. प्लुत ।

। ऽ ० ० 2 विलोकितं (त) । [७]

[९९] ललितप्रिये(य)ताले स्यात् सगणोऽनन्तरौ लग (गौ) ॥ १३० ॥

। । ऽ । ऽ ललितप्रियताल (ल) । [७]

[१००] जनकाभिधताले स्यान् नयसेभ्य. परं गुरु. ।

। । । । ऽ ऽ । । ऽ ऽ जनकतालं (ल) । [१४]

[१०१] बिन्दुद्वय विरामान्त लक्ष्मीशे लौ प्लुतस्तत (त) ॥ १३१ ॥

० ०' । । 2 लक्ष्मीशेखर(लक्ष्मीश) तालं (ल) । [६¼]

बिन्दुद्वय विरामान्त खप्लुतौ रागवर्धने ।

० ०' ० 2 रागवर्धनताल (ल) । [४¾]

बद्धापणस्तु कथितो लघो(घ्वो)रूर्ध्वं प्लुत लघु ॥ १३२ ॥

। । 2 । बद्धापणतालं (ल') । [६]

नेति केचित् पक्षं (केषाचित् पक्ष.) ।

लघुद्व(द्वौ)तौलघू गश्च त्र्यश्रवर्णे प्रकीर्तिता ।

। ० ० । । ऽ त्र्यश्रवर्णतालं (ल.) । [६]

प्रतितुर्यं विरामान्ता मिश्राख्ये द्वाद्दश द्रुताः ॥ १३३ ॥

प्लुतौ गुरू द्रुतद्वन्द्व गद्वय ल (लौ) गुरुस्ततः ।

(००') ००' ००' ००' ००' ००' 2 2 ऽ ऽ ० ० ऽ ऽ । ऽ

(००००' ००००' ००००' 2 2 ऽ ऽ ० ० ऽ ऽ । ऽ) (?)

मिश्रवर्णतालं (ल') ।

भकारान्तो(न्ते) गुरुद्वन्द्वं निश्शब्दमनु वा भवेत् (?) ॥ १३४ ॥

ऽ । । ऽ ऽ (+) मड्डुतालं (ल) ।

अथवा नगणो गश्च लघुश्चैक (कः) प्रकीर्तिता (त') ।

। । । ऽ । मड्डुताल (ल') ।

केचित्तु वक्रयोर्मध्ये बिन्दुयुग्म प्रचक्षसे (ते) ॥ १३५ ॥

ऽ ० ० ऽ नन्दनताल (ल) ।

विरामादि खयुग्मान्त लद्वयं चेति केचन ।

। । (। ।') ० ० द्वितीयमङ्गिका ।

अन्यो लघ्वादि गु(र्गु)र्वो(र्वे)न्त्याद् भवेद् बिन्दुचतुष्टयात् ।

॥ १३६ ॥

। ० ० ० ० ऽ

द्रुतद्वय गुरू खण्डे

० ० ऽ ऽ खण्डकङ्काल (ल) ।

गुरुद्वन्द्वं लघुस्समे ।

ऽ ऽ । समकङ्कालकालं (ताल)

एको लघुर्गुरुद्वन्द्वं कङ्काले विषमे भवेत् ॥ १३७ ॥

। ऽ ऽ विषमकङ्कालतालं (ल)

अथ नि.सारुक (क) कैश्चित् अयमेवाभिधीयते ।

निस्सारुकं (क.) ।

अमुमेव वदन्त्यन्ये तालं बद्धापणाभिदं (धम्) ॥ १३८ ॥

त्रिमात्रिकं (कः) पुन कैश्चित् अयमेव प्रकीर्तित. ।

चतुर्मुखताल (लः)

॥ श्रीः ॥

॥ श्री ॥

मातृकाताल,* कन्दुकताल', आर्याताल., कलहंसताल:,

चक्रवालताल:, चतुष्पन्दि(दी)ताल, वृत्तताल, हयलीलाताल:,

गौन्धिताल', विजयताल:, कालार्णवताल', वस्तुताल:,

षपती(षट्पदी)ताल', गद्यताल, हरिपूर्णताल,

ध्वनिविल(ला)सताल', पञ्चताल, स्वराङ्कताल,

अङ्कध्वनिताल, दण्डताल, शरभलीलाताल, आमन्ध(ण्ड)नताल,

नन्दनताल', द्वी(दी)पकताल, क्रौञ्चपदताल, सलीलाताल:,

हयमालबन्धनि (भयमालापध्वनि)ताल., हसपदताल,

द्राविणादिताल, ढेङ्किताल:. चर्चरीताल, जयताल',

श्रीलम्बताल, कैलाटताल:, सिहपदताल, द्विनेमताल,

बन्धनि(वर्द्धनी)ताल, जयश्रीताल, वर्धमानताल,

रथ्या(थ्य)पदताल, बि(वि)भ्र(म)ताल, दाहताल,

पञ्चभागताल., ललिता(त)ताल, श्रीनन्दनताल,

श्रीखण्डनताल, करणाख्यताल., गलबन्धताल,

पाक(ट)ताल, पदगानताल, मिश्रताल, चित्रताल,

स्वरताल:, पाट्मताल: (?) अ(अड्)कवा(चा)रिणि(णी)ताल,

त्रिपदि(दी)ताल, हंसलीलाताल:, दोलहरिताल.,

चरितताल, धवलताल:, श्री(त्रि)भङ्गिताल.,

रणरङ्गताल:, सिहविक्रान्तताल:, स्वरपूर्वताल,

शुभताल., पाण्डुपातताल:, अभिनन्दनताल,

---

*मूले सर्वत्र 'ताल' इति शब्दप्रयोग । स च तद्देशीयोच्चारणपद्धत्या कृत: । दक्षिणप्रदेशे उच्चारणं देशाचारस्तथा वर्तते पर सर्वसमत 'ताल' इति पुलिङ्गे वर्तमान रूढ शब्दप्रयोगोऽत्र रक्षित ।

श्रीविलासताल., श्रीरङ्गवर्धनताल., शुकशारिकाताल,

बन्धापणताल, कदम्बिनीताल, उन्मत्तरागताल,

नागकदम्बताल., मनोरमताल., चतुर्मुखताल,

चतुरङ्गताल., रथ्य(थ्या)ताल, लम्बताल., अण्डताल,

रूपकताल, मड्डु(ट्ट)ताल, पडिमड्डु(ट्ट)ताल., एकताल.

स्वरप्रबन्धताल, अनेकताल, स्तवमञ्जरीताल,

सिहलीलाताल, मिश्रस्वरान्ध(र्द्ध)(र्थ)ताल, शुद्धस्वरार्द्ध(र्थ)ताल,

दाहन्धेयताल, मन्जुताल, द्विगुणताल, प्रमोदताल,

स्वरसन्दोहताल, प्रतापमङ्गलताल, जयमङ्गलाचारताल,

सममात्रताल, नम्रताल., पा(प)रमताल, पत्रताल।

॥ इत्येकोत्तरशतम् ॥

॥ श्री ॥

|| श्रीः ||

मातृका कन्दुतालश्च आर्या च कलहंसकम् (क.) ।
चक्रवाल च(श्च)तुष्पद्या(दी)वृत्त च हयलीलकम् (कः) || १ ||

गोन्धिश्च विजया(य)श्चैव कालार्णवं च (वश्च) वस्तु च ।
षट्पदी गद्यतालश्च हमि(रि)पूर्वकमे(ए)व च || २ ||

ध्वनिविलासे (स) पञ्चतालं (ल) स्वराङ्कोऽङ्कध्वनिस्तथा ।
दण्डश्शरभलीला—(च) आमण्डन(नो) हि नन्दने (न) || ३ ||

द्विपदस्तु क्रौञ्चपद(द·) सलीलातालमेव च ।
हयमालाबन्धनि(भयमालापध्वनि ?)स्तु हसपाद(द)स्तथैव च || ४ ||

द्राविणादि त(स्त)था ढो(ढे)ङ्की किन्वे (वे)चरी(चच्चरी)ताल-
मे(ए)व च ।
जय श्रीलम्बतालश्च कैलाभ(ट)स्तु तथैव च || ५ ||

सिहपाद(दो)न्द्वि(द्वि) नेमस्तु वर्द्धनीतालमे(ए)व च ।
जयश्री व(र्व)र्द्धमान च (नश्च) रथ्य(थ्या)पाद(द) त(स्त)थैव च ||६||

—(वि)भ्रम(मो)न्दा(दा)हतालश्च (श्च) पञ्चभागस्तथैव च ।
ललित. श्रीनन्दतालं (ल) श्रीखण्डं (ण्डः) करमा(णा)ख्यकम्
(क) || ७ ||

गलवर्द्ध (बन्धः) पाटतालं (ल) पदगानं त(नस्त)थैव च ।
मिश्रं(श्र)श्चित्रकतालश्च स्वर(रः) पाड(ट)मतालकम् (कः) || ८ ||

अङ्कचारु(रि)णि(णी)तालं (ल)श्च त्रिपदिस्तु(दी तु) तथैव च ।
हंसलीला दोहलरी (?) चञ्चरित(चरितो)न्ध(ध)वलाख्यकम् (कः) ||९||

त्रिभङ्गि(ङ्गी)रणराग(रङ्ग)श्च सिंहविक्रान्ततालकम् (क) ।
स्वरपूर्व शुभः पाण्डुरभिनन्दनतालकम् (क·) || १० ||

श्रीविलासस्तु श्रीरङ्गवर्द्धनीतालमे(ए)व च ।
शुकशारिकितालं च (लश्च) वन्धापण कदम्बिनी ॥ ११ ॥

उन्मत्तरागतालश्च(श्च) नागकदम्बस्तथै(नागकदम्ब ए)व च (´)।
मनोरमचतुर्मुख्य (खौ) चतुरङ्गन्त(स्त)थैव च ॥ १२ ॥

रक्ष्य(थ्य्)ताल (लो) लम्बतालं (ल.) अण्डताल च (लश्च) रूपकम्
(कः)।
मड्डु(ट्ट)श्च पडिमड्डु(ट्ट)श्च एकतालं त(लस्त)थैव च ॥ १३ ॥

स्वरप्रबन्धतालश्च (लश्च) अनेक(क)स्तवमञ्जरी ।
